श्री मातंगी स्तोत्रं

श्री मातंगी स्तोत्रं

ईश्वर उवाच |
आराध्य मातश्चरणांबुजे ते
ब्रह्मादयो विस्तृतकीर्तिमापुः |
अन्ये परं वा विभवं मुनींद्राः
परां श्रियं भक्तिभरेण चान्ये || 1

नमामि देवीं नवचंद्रमौळे-
-र्मातंगिनीं चंद्रकळावतंसां |
आम्नायप्राप्तिप्रतिपादितार्थं
प्रबोधयंतीं प्रियमादरेण || 2 ||

विनम्रदेवासुरमौळिरत्नै-
-र्नीराजितं ते चरणारविंदं |
भजंति ये देवि महीपतीनां
व्रजंति ते संपदमादरेण || 3 ||

कृतार्थयंतीं पदवीं पदाभ्या-
-मास्फालयंतीं कृतवल्लकीं तां |
मातंगिनीं सद्धृदयां धिनोमि
लीलांशुकां शुद्धनितंबबिंबां || 4 ||

तालीदळेनार्पितकर्णभूषां
माध्वीमदोद्धूर्णितनेत्रपद्मां |
घनस्तनीं शंभुवधूं नमामि
तटिल्लताकांतिमनर्घ्यभूषां || 5 ||

चिरेण लक्ष्यं नवलोमराज्या
स्मरामि भक्त्या जगतामधीशे |
वलित्रयाढ्यं तम मध्यमंब
नीलोत्पलांशुश्रियमावहंत्याः || 6 ||

कांत्या कटाक्षैः कमलाकराणां
कदंबमालांचितकेशपाशं |
मातंगकन्यां हृदि भावयामि
ध्यायेयमारक्तकपोलबिंबं || 7 ||

बिंबाधरन्यस्तललामवश्य-
-मालीललीलालकमायताक्षं |
मंदस्मितं ते वदनं महेशि
स्तुत्यानया शंकरधर्मपत्नीं || 8 ||

मातंगिनीं वागधिदेवतां तां
स्तुवंति ये भक्तियुता मनुष्याः |
परां श्रियं नित्यमुपाश्रयंति
परत्र कैलासतले वसंति || 9 ||

उद्यद्भानुमरीचिवीचिविलसद्वासो वसानां परां
गौरीं संगतिपानकर्परकरामानंदकंदोद्भवां |
गुंजाहारचलद्विहारहृदयामापीनतुंगस्तनीं
मत्तस्मेरमुखीं नमामि सुमुखीं शावासनासेदुषीं || 10 ||

इति श्रीरुद्रयामले मातंगी स्तोत्रं |